








Principal Office : 01702-225812
Office : 01702-226812
gscnahan-hp@nic.in





**2023-24**

# विवरणिका

**गोरक्षनाथ - राजकीय - संस्कृत - महाविद्यालय : नाहनं,**
**सिरमौर :, हिमाचल - प्रदेशः**

# ★ महाविद्यालय शिक्षण संकाय ★



## डॉ. सन्दीप कुमार

प्राचार्यः एवं सहायकाचार्यः (दर्शनम् )
दर्शनाचार्यः एम. ए., विद्यावारिधिः ( पीएच. डी.)



### डॉ. सन्नी कुमारः

सहायकाचार्यः (वेदः)
वेदाचार्यः ( लब्धस्वर्णपदकः), नैट. जे.आर.एफ.
एम. ए. संस्कृतम्, शिक्षाशास्त्री
विद्यावारिधिः( पीएच. डी.)



### डॉ. ज्ञानेश्वरः

सहाकाचार्यः (ज्योतिषम्)
नैट. शिक्षा-आचार्या, लब्धस्वर्णपदकद्वयम्
विद्यावारिधिः ( पीएच. डी.)



### डॉ. सोमदत्त

सहायकाचार्यः (व्याकरणम्)
व्याकरणाचार्यः एम. ए. संस्कृतम्
विद्यावारिधिः पीएच. डी.



### आचार्य सुरेशः

सहायकाचार्यः (साहित्यम्)
एम. ए. संस्कृतम्, साहित्याचार्यः
दर्शनाचार्यः ज्योतिषाचार्यः च
विषयत्रये लब्धस्वर्णपदकः



### डॉ. सुमिता

साहित्याचार्य, एम. ए संस्कृत.,
नेट विधाद्वयेऽपि लब्ध जे. आर. एफ.
विद्यावारिधिः (पीएच. डी.)



### डॉ. विनीता पाल

सहायकाचार्य ( अंग्रेजी)
एम. ए. अंग्रेजी, बी.एड. एम. फिल. पीएच. डी.



### श्रीमती अम्बरा देवी

एम.ए. बी.एड. नैट. जे. आर. एफ. प्रभाकर
-परीक्षायां लब्धस्वर्णपदकम्



### श्रीमती नीरजा तोमर

प्रवक्ता (अंग्रेजी)
एम.ए. अंग्रेजी, एम. फिल. अंग्रेजी, बी. एड.



### श्री सुरेश कुमारः

कार्यालय अधीक्षकः



### सुश्री बबिता कुमारी

कार्यालय लिपिका



### श्री ताराचन्दः

प्रवक्ता (राजनीतिशास्त्रम्)
एम. ए. राजनीतिशास्त्रम् इतिहासश्च, बी. एड. पी. टी. ए.



### श्री नरेन्द्र सिंहः

(डी.पी.ई)
एम. पी. एड. एम. फिल. शारीरिक-शिक्षा



### उमा देवी

चतुर्थश्रेणी कार्यकर्त्री



### बचनी जी

चतुर्थश्रेणी कार्यकर्त्री



### कौशल्या जी

चतुर्थश्रेणी कार्यकर्त्री



## वैदिकं मङ्गलाचरणम्

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते।।
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि।।
समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति।।
-ऋग्वेद १०/१९१

## सरस्वतीवन्दना

या कुन्देन्दु-तुषारहार-धवला या शुभ्रवस्त्रावृता।
या वीणा-वरदण्ड-मण्डितकरा या श्वेतपद्मासना।।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता।
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।
शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीम्।
वीणा-पुस्तक-धारिणीमभयदे जाड्यांधकारापहाम्।।
हस्ते स्फाटिक-मालिकां विदधतीं पद्मासने संस्थिताम्।
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्।।

## वैदिकं राष्ट्रगीतम्

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी
महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू
रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः
पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।।
-( यजु. सं. २२।२२)

# विषयानुक्रमणिका

1. मङ्गलाचरणम् ........................................................................ १

2. विषयानुक्रमणिका ................................................................... २

3. प्राचार्य-अभिमतम् .................................................................. ३

4. महाविद्यालयस्य परिचयः ........................................................ ४

5. प्रवेशनियमाः ........................................................................ ४-६

6. विषयचयनम् एवं पाठ्यक्रमः................................................. ७-११

7. महाविद्यालयस्य शुल्कः .......................................................... १२

8. छात्रवृत्तयः, छात्रावासः, पुस्तकालयश्च ...................................... १३

9. सामान्य-नियमाः .................................................................... १४

10. सहशैक्षणिक-शिक्षणेतर-गतिविधयः ......................................... १४

11. एन. सी.सी. एवम् एन. एस. एस. ............................................. १५

12. केन्द्रीय-छात्र-संघटनम्, वाटिका(Eco club) ............................ 16

13. अभिभावक-शिक्षक-संघः ....................................................... १६

14. क्रीडा,शैक्षणिकपर्यटनम्, वार्षिकोत्सवश्च .................................. १७

15. वार्षिकगतिविधीनां तिथिपत्रम् .................................................. १८

# प्राचार्य-अभिमतम्

शिक्षाक्षेत्रे लब्धप्रतिष्ठोऽयं गोरक्षनाथ-राजकीय-संस्कृतमहाविद्यालयः चत्वारिंशदुत्तरनवदशशतात् ख्रिष्टाब्दाद् (१९४०) आरभ्य स्वकीयं महनीयं स्थानम् आदधाति। महन्तश्रीमौक्तिकनाथराजगुरुणा सिरमौरजनपदस्य नाहनस्थे सुप्रसिद्धे कालिस्थान-मन्दिर-परिसरे गोरक्षनाथ-संस्कृतमहाविद्यालयस्य स्थापना कृता। मानवजीवनोत्कर्षकाणां शास्त्राणाम् अध्ययनाध्यपने संलग्नायाः अस्याः संस्थायाः महत्त्वमुपयोगिताञ्च दृष्ट्वा हिमाचलसर्वकारेण राजकीयसंस्कृतमहाविद्यालयरूपेण अस्य अधिग्रहणं कृतम् छात्रेषु उत्तमगुणाधानेन, इयं संस्था समर्पितराष्ट्राणां नागरिकाणां निर्माणे विविधान् आदर्शान् स्थापयति।

शिक्षा आध्यात्मिकम्,बौद्धिकम्,शारीरिकम्, मानसिकञ्च विकासं करोति। अस्मदीये महाविद्यालये छात्राणां व्यक्तित्वस्य सर्वाङ्गीणविकासाय शैक्षणिक-सांस्कृतिक-सामाजिक-नैतिक-मूल्यवर्धकानां कार्यक्रमाणां शृङ्खला अनवर्तम् आवर्षं परिवर्त्तते। नेशनलकैडेटकोर-राष्ट्रीयसेवायोजनयोः सञ्चालमप्यस्मिन् महाविद्यालये भवति। छात्राः एवं विविधाभिः प्रतियोगिताभिः कार्यक्रमैश्च कौशलापन्नाः लाभान्विताः सन्तः आत्मनिर्भर-भारतस्य सङ्कल्पनां परिपूरयन्ति। तपस्या समं भवन्ति ज्ञानप्राप्त्युपायाः। एतन्निमित्तम श्रद्धानिष्ठाभ्यां सहैव अनुशासन-जिज्ञासा-स्वाध्याय-प्रतिबद्धतादीनां परमावश्यकता भवति। एतै गुणैः युक्तः छात्रगणो भवतु। छात्रहिते सदा निरतः, अस्य महाविद्यालयस्य सुयोग्यःआचार्यवर्गः कर्मठः अत्यन्तम् अनुभवी च वर्त्तते। तस्मात् अस्माकीनाः छात्राः विविधासु प्रतियोगिपरिक्षासु उच्चस्थानं प्राप्नुवन्ति। सविश्वासम् आशासे अहं यत् गरिमामयीं परम्पराम् एताम् अग्रे अनुसरिष्यन्ति भवन्तः। सश्रद्धाः निष्ठापूर्वकं भवन्तः शिक्षकाणाम् आशीर्वादात्मकं मार्गदर्शनं प्राप्स्यन्ति। भवन्तः सर्वेऽपि स्वकीयं स्वर्णिमं लक्ष्यं प्राप्नुवन्तु एतन्निमितं महाविद्यालयः सदैव कार्यरतः भविष्यति। अतः भवन्तः अपि स्वलक्ष्यं प्राप्तुं बद्धकटयः भवन्तु-

"उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।"

डॉ. सन्दीपशर्मा
प्राचार्यः
गोरक्षनाथ-राजकीय-संस्कृत-महाविद्यालय-नाहनम्
सिरमौरः, हि.प्र.।

## महाविद्यालयस्य परिचयः

गोरक्षनाथ- राजकीय-संस्कृत-महाविद्यालय-नाहनं संस्कृताध्ययनदृष्ट्या हिमाचलप्रदेशस्य प्रतिष्ठितेषु शैक्षणिक-संस्थानेष्वन्यतमः महाविद्यालयः वर्त्तते। अस्य महाविद्यालयस्य प्रारम्भःहिमाचलप्रदेशस्य सिरमौरजनपदस्य नाहनस्थे सुप्रसिद्धे कालिस्थान-मन्दिरे महन्त-श्रीमौक्तिकनाथ-राजगुरुणा वेदशास्त्राणाम् अध्ययननिमित्तं कृतः। अस्य महाविद्यालयस्य स्थापना १९९६ तमे विक्रमाब्दे (१९४० ख्रिष्टाब्दे) अभवत्। २०२२ विक्रमाब्दे (१९६५ तमे ख्रिष्टाब्दे) हिमाचलप्रदेश-सर्वकारेण संस्कृतस्य प्रचार-प्रसाराय राजकीय-संस्कृत -महाविद्यालय नाम्ना अस्य अधिग्रहणं कृतम्। हिमाचलप्रदेश-विश्वविद्यालय- सम्बद्धः अयं महाविद्यालयः, विश्वविद्यालय- अनुदान-आयोग-दिल्लीतः मान्यतां प्राप्य संस्कृतस्य क्षेत्रे महत्त्वपूर्णं दायित्वं निर्वहति। अस्मिन्महाविद्यालये शास्त्रि-विशिष्टशास्त्री इत्यनयोः उपाधयोः कृते अध्यापनं कार्यते। महाविद्यालये अस्मिन् बालकबालिकानां कृते पृथक्-पृथक् छात्रावस-द्वयं वर्त्तते। प्रतिवर्षं छात्राणां वर्धमानायाः संख्यायाः कारणेन बालिकानां कृते निर्मितस्य छात्रावास-भवनस्य प्रयोगः अस्थायिरूपेण अध्यापनार्थं प्रचलति। एतदतिरिक्तम् अस्य भवनं, सविशालसभागारं, छात्राणां व्यक्तित्वविकास-गतिविधीनां कृते पर्याप्तस्थानयुक्तं वर्त्तते। लब्धप्रतिष्ठोऽयं महाविद्यालयः भारतस्य उत्तरे भागे विद्यमानासु संस्कृतसंस्थासु अन्यतमः अग्रगण्यश्च अस्ति। सुसमृद्धः पुस्तकालयः सुयोग्याः शिक्षकाः अनुशासितं शैक्षणिकं वातावरणं च अस्य महाविद्यालयस्य वैशिष्ट्यानि।

## शास्त्री एवं विशिष्टशास्त्री

सर्वासामपि कक्षाणां छात्राणां कृते व्याकरणसाहित्ये अनिवार्यविषयत्वेन स्तः। वेददर्शनज्योतिषां कौचित् अन्यतमौ विषयौ ऐच्छिकविषयरूपेण चीयेते। विशिष्टशास्त्रिनिमित्तम् एवम् एव संस्कृतस्य चतुर्भिः विषयैः समम् एव कलास्नातककक्षायाः विषयद्वयम् इतिहासेषु राजनीतिशास्त्र-आङ्ग्लं तथाच हिन्दी, कस्यचित् अन्यतमस्य चयनस्य विकल्पः अस्ति। कलास्नातकस्य विषयद्वयस्य अध्येतारः छात्राः एव विशिष्टशास्त्री इति उपाधिं प्राप्तु शक्ष्यन्ति।

प्राक्शास्त्री एवं शास्त्रिकक्षासु प्रवेशार्थम् आवश्यकानां प्रमाणपात्राणां सूची

1.आवेदनपत्रम्। 2.दशमकक्षायाः प्रमाणपत्रम् ( छायाप्रतिः)। 3.+2 कक्षायाः प्रमाणपत्रम्। 4.छात्रस्य चित्रद्वयम्। 5.विद्यालय-त्याग-प्रमाण-पत्रम्। 6.चरित्रप्रमाणपत्रम्। 7.एस सी/ एस टी/ओ बी सी/ आई आर डी पी/ बी पी एल/ अल्पसंख्यक- समुदायः दिव्यांगता इत्यादिषु किञ्चन प्रमाणपत्रम् यदि अस्ति तर्हि ( छायाप्रतिः१) 8.आधारप्रमाणपत्रम् ( छायाप्रतिः १) 9.हिमाचलप्रदेशस्य स्थायि-निवास-प्रमाणपत्रम्। 10.यदि पात्रतापरीक्षा हिमाचलप्रदेशात् अन्यस्मात् कस्मात् अपि प्रदेशस्य बोर्ड अथवा विश्वविद्यालयात् उत्तीर्णा अस्ति तर्हि प्रव्रजनप्रमाणपत्रम् अपेक्षितम् अस्ति एव। विषायाणां तदन्तरगतानां पाठ्यक्रमाणां विवरणम् एवं अस्ति-

## प्रवेशनियमाः

**प्राक्शास्त्रिप्रथमवर्षे प्रवेशार्थं नियमाः**

प्राक्शास्त्रिप्रथमवर्षे ते सर्वेऽपि छात्राः प्रवेशार्हाः भविष्यन्ति ये मान्यताप्राप्तायाः परिषदः(बोर्ड) दशमीकक्षोत्तीर्णाः स्युः. । अपिच यैः छात्रैः पूर्वमध्यम-द्वितीय-खण्डस्य परीक्षा अथवा विद्याधिकारिपरीक्षा-उत्तीर्णाः तेऽपि प्राक्शास्त्रिप्रथमवर्षे प्रवेशार्थं योग्याः भविष्यन्ति।

**प्राक्शास्त्रिद्वितीयवर्षे प्रवेशार्थं नियमाः**

प्राक्शास्त्रिद्वितीयवर्षे मात्रं ते एव छात्राः प्रवेशं प्राप्तुं शक्नुवन्ति ये प्राक्शास्त्रि-प्रथमवर्ष-परीक्षोत्तीर्णः स्यात्।

**आयुः**

हिमाचलप्रदेशविश्वविद्यालयस्य पत्रसंख्यायाः४-२०/२०१५- एच. पी.यू. ( शै.) २३ जून,२०१७ अनुलसारेण प्राक्शास्त्रिप्रथमवर्ष-प्राक्शास्त्रि-विशिष्टशास्त्रि-आचार्य-कक्षासु प्रवेशार्थम् आयुसम्बन्धिनः ते एव नियमाः भविष्यन्ति येषाम् उल्लेखः हिमाचलप्रदेशविश्वविद्यालयस्य अध्यादेशस्य ३.३ (ए) तमे अनुच्छेदे कृतः अस्ति।

**शास्त्रि-उपाधिः**

हिमाचलप्रदेशविश्वविद्यालयस्य अधिनियमस्य २००२ VoL. 1 Chater 5.3 (L) तथाच Chapter8.80-81 इत्येतयोः इच्छानुसारेण इत्यस्य अभिप्रायः तादृशः पाठ्यक्रमः अस्ति, यत्र विद्यार्थी निर्धारिते समायावधौ मात्रं संस्कृतस्य एव विविधान् पाठ्यक्रमान् अधीते। यतः एते पाठ्यक्रमाः मात्रम् एकं विषयं (संस्कृतम) यावत् सीमिताः सन्ति। अतः एतादृशं पाठ्यक्रमम् अवलम्ब्य उत्तीर्णः विद्यार्थी स्नातककक्षा-समकक्षः न भविष्यति। अनेन कारणेन शास्त्रिपरीक्षोत्तीर्णः छात्रः स्नातकोत्तर-कक्षायां प्रवेशार्हः न भवति । परन्तु हिमाचलप्रदेशविश्वविद्यालयस्य २००२, VOL.1.1,8.77 अध्यादेशस्य व्याख्यायाः अनुसारेण शास्त्रिपरीक्षोत्तीर्णः / लिखितानुपूरकपरीक्षः विद्यार्थी आचार्यप्रथमवर्षस्य कक्षायां प्रवेशं प्राप्तुं शक्नोति।

**शास्त्रि-उपाधि-निमित्तं प्रवेशनियमाः**

शास्त्रिप्रथमवर्षे प्रवेशार्थं ते सर्वेऽपि छात्राः योग्याः भविष्यन्ति, ये हिमाचलप्रदेश-विश्वविद्यालयस्य प्राक्शास्त्रिप्रथमवर्षं प्राक्शास्त्रि-द्वितीयवर्षं च उत्तीर्णवन्तः। एतदतिरिच्य ते सर्वेऽपि विद्यार्थिनः शास्त्रि-प्रथमवर्षे प्रवेशं प्राप्तुं शक्ष्यन्ति ये हिमाचलप्रदेशविश्वविद्यालय-द्वारा स्वीकृतेभ्यः मानितेभ्यः वा संस्थानेभ्यः प्राक्शास्त्रिप्रथमवर्षस्य, प्राक्शास्त्रिद्वितीयवर्षस्य समकक्ष-परीक्षाम् उत्तीर्णवन्तः। हिमाचलप्रदेशविश्वविद्यालयेन २०२२ तमस्य ख्रिष्टाब्दस्य दिसम्बरमासस्य त्रयोदशे दिनाङ्के अधिसूचितं यत् ये छात्राः +2 कक्षां संस्कृतविषये न उत्तीर्णवन्तः ते छात्रा अपि शास्थ्रिप्रथमवर्षे प्रेवेशं प्राप्तुं योग्याः सन्ति। किन्तु तैः छात्रैः शास्त्रिप्रथमवर्षे अनुवादस्य एकस्मिन् पत्रे उत्तीर्णता प्राप्तव्या। अस्मिन् पत्रे प्राप्ताङ्कानां योगः कुलाङ्केषु न भविष्यति। परीक्षापत्रं ५० अङ्कानां भविष्यति।अस्य पाठ्यक्रमः निम्नप्रकारेण भविष्यति

# प्रवेशनियमाः

## परीक्षापाठ्यक्रमः

शब्दरूपाणि  राम, लता, ज्ञान. अस्मद्, युष्मद्, तत्।

धातुरूपाणि  भू, पठ्, अस्, क्रीड, चुर्,।

लकाराः लृट्, लट्, लोट्, लङ्।

विभक्तिपरिचयः, दशवाक्यानाम् अनुवादःकर्तृवाच्ये, दशवाक्यानि कर्मवाच्ये।

## आयुसीमा

हिमाचलप्रदेशविश्वविद्यालयस्य ४-२०/२०१५-एच. पी. यू.(शै.) दिनाङ्क २३ जून २०१७ पत्रसंख्यायाः अनुसारेण प्राक्शास्त्रि-विशिष्टशास्त्रि- आचार्यकक्षासु आयुसीमायाः ते सर्वेऽपि नियमाः मान्याः भविष्यन्ति येषाम् उल्लेखः हिमाचलप्रदेशविश्वविद्यालयस्य आदेशे३.३ ए. तमे अनुच्छेदे अस्ति।

## विशिष्टशास्त्री

हिमाचलप्रदेशविश्वविद्यालयस्य अध्यादेशस्य २००२ ए. खण्ड-१,८.७० तथाच ८.७१ अनुच्छेदस्य अनुसारेण विशिष्टशास्त्री इत्यस्य अभिप्रायः एतादृशेन पाठ्यक्रमेण अस्ति यत्र विशिष्टशास्त्रि-निमित्तं निर्धारिते समयावधौ संस्कृतपाठ्यक्रमाणाम् अतिरिक्तं संस्कृतेतरयोः द्वयोः पाठ्यक्रमयोः अपि अध्ययनं करोति। अनयोः संस्कृतेतरयोः पाठ्यक्रमयोः सह आङ्ग्लपाठ्यक्रमःपठनीयः यः पाठ्यक्रमः स्नातककक्षायां बी. ए. पाठ्यते। आङ्ग्लभाषायाः अतिरिक्तं स्नातककक्षायां (बी.ए.) अध्याप्यमानस्य कस्यचन अन्यस्य( Elective additional) विषयस्य चयनं विद्यार्थी स्वरुच्यनुगणं कर्त्तुं शक्नोति। परन्तु अयं विषयः ( Elective additional)विशिष्टशास्त्रिकक्षायाम् अधीयमानस्य संस्कृतपाठ्यक्रमस्य विषयेभ्यः पृथक् स्यात्।

## अनिवर्या टिप्पणी

अतिरिक्त-अनिवार्य/ संस्कृतेतर-विषयैः (additional Elective/non Sanskrit Subject) सह विशिष्ट-शास्त्रि-परीक्षोत्तीर्णः छात्रः संस्कृतस्य स्नातकोत्तर-कक्षायां संस्कृतेतरासु स्नातकोत्तरकक्षासु शिक्षाशास्त्रिकक्षायां (B.ED) एल. एल. बी इत्यादिषु कक्षासु प्रवेशार्हः भविष्यति। एतदतिरिच्य विशिष्टशास्त्रिपरीक्षोत्तीर्णः विद्यार्थी भारतीयानां प्रादेशिकानां यथा प्राशासनिकानां नैयायिकानाम् आरक्षकविभागीयादीनां परीक्षाणां नियुक्तीनां कृते अपि अर्हः भविष्यति। आशयः अयम् अस्ति यत् विशिष्टशास्त्रिपदवीकस्य सर्वाः अपि अर्हताः ताः एव भविष्यन्ति याः कलास्नातकस्य( B.A) भवन्ति। विद्यालयेषु संस्कृत-अध्यापकत्वेन नियुक्तिनिमित्तं लब्धशास्त्रिपदवीकः विद्यार्थी अर्हः भविष्यति।

प्राक्शास्त्रि-कक्षयोः संस्कृतस्य चत्वारः विषयाः अनिवार्याः भवन्ति। इमे व्याकरण-काव्यनाटकदर्शनादयः सन्ति। एतदतिरिच्य निबन्धानुवादगद्यपद्य-ऐच्छिकविषययोः आङ्ग्लं तथाच हिन्दी-इतिहासेषु कश्चन अन्यतमः चित्वा ऐच्छिकविषयाणां चयनं कर्त्तुं शक्यते।

शास्त्री एवं विशिष्टशास्त्री

सर्वासामपि कक्षाणां छात्राणां कृते व्याकरणसाहित्ये अनिवार्यत्वेन स्तः। वेद-दर्शन-ज्योतिषां कौचित् अन्यतमौ विषयौ ऐच्छिकविषयरूपेण चीयेते। विशिष्टशास्त्रिनिमित्तम एवम् एव संस्कृतस्य चतुर्भिः विषयैः समम् एव कलास्नातककक्षायाः विशयद्वयम् इतिहासेषु राचनीतिशास्त्र-आङ्ग्लं तथाच हिन्दी, कस्यचित् अन्यतमस्य चयनस्य विकल्पः अस्ति। कलास्नातकस्य विषयद्वयस्य अध्येतारः छात्राः एव विशिष्टशास्त्री इति उपाधिं प्राप्तुं शक्ष्यन्ति।

## प्राक्शास्त्री एवं शास्त्रिकक्षासु प्रवेशार्थं आवश्यकानां प्रमाणपत्राणां सूची

1. आवेदनपत्रम्।
2. दशमकक्षायाः प्रमाणपत्रम् (छायाप्रतिः)
3. +2 कक्षायाः प्रमाणपत्रम्।
4. छात्रस्य चित्रद्वयम्।
5. विद्यालय-त्याग-प्रमाण-पत्रम्।
6. चरित्रप्रमाणपत्रम्।
7. एस सी/ एस टी/ ओ बी सी/ आई आर डी पी/ बी पी एल/ अल्पसंख्यक समुदाय /दिव्यांगता इत्यादिषु किञ्चन प्रमाणपत्रम् यदि अस्ति तर्हि।
8. आधारप्रमाणपत्रम् ( छायाप्रतिः 1)
9. हिमाचलप्रदेशस्य स्थायि-निवास-प्रमाणपत्रम्।
10. यदि पत्रतापरीक्षा हिमाचलप्रदेशात् अन्यस्मात् कस्मात् अपि प्रदेशस्य बोर्ड अथवा विश्वविद्यालयात् उत्तीर्णा अस्ति तर्हि प्रव्रजनप्रमाणपत्रम् अपेक्षितम् अस्ति एव।

विषयाणां तदन्तर्गतानां पाठ्यक्रमाणां विवरणम् एवम् अस्ति-

# प्राक्शास्त्रिप्रथमवर्षम्

## अनिवार्यविषयाः

| क्र. सं. | पत्रम् | विषयः | निर्धारितग्रन्थः |
|---|---|---|---|
| 1 | प्रथमं पत्रम् | व्याकरणम् | लघुसिद्धान्तकौमुदी (पूर्वार्धः) |
| 2 | द्वितीयं पत्रम् | काव्यनाटकम् | रघुवंशस्य प्रथमद्वितीयसर्गौ,स्वप्नवासवदत्तम्, वृत्तरत्नाकरः |
| 3 | तृतीयं पत्रम् | निबन्धानुवादः तथाच गद्यं पद्यम् | अनुवादचन्द्रिका, हितोपदेशः, अमरकोषः |
| 4 | चतुर्थं पत्रम् | दर्शनम् | तर्कसङ्ग्रहः, ईशावास्योपनिषद् श्रीमद्भगवद्गीता (1-2 अध्यायः) |

## ऐच्छिकविषयाः

| क्र. सं. | पत्रम् | विषयः | निर्धारितं पुस्तकम् |
|---|---|---|---|
| 1 | पञ्चमं पत्रम् | आङ्ग्लम् | हिमाचप्रदेशशिक्षापरिषद्- (बोर्ड)द्वारा+1 कक्षायाः कृते निर्धारितः पाठ्यक्रमः |
| 2 | षष्ठं पत्रम् | हिन्दी-राजनीतिशास्त्र-इतिहासेषु अन्यतम् | हिमाचप्रदेशशिक्षापरिषद्- (बोर्ड)द्वारा+1 कक्षायाः कृते निर्धारितः पाठ्यक्रमः |

# प्राक्शास्त्रिद्वितीयवर्षम्

## अनिवार्यविषयाः

| क्र. सं. | पत्रम् | विषयः | निर्धारितग्रन्थः |
|---|---|---|---|
| 1 | प्रथमं पत्रम् | व्याकरणम् | लघुसिद्धान्तकौमुदी (उत्तरार्धः) |
| 2 | द्वितीयं पत्रम् | काव्यनाटकम् | कुमारसम्भवम् 1-2 सर्गौ, भारतविजयनाटकम्, काव्यदीपिका |
| 3 | तृतीयं पत्रम् | निबन्धानुवादः तथाच गद्यं पद्यम् | अनुवादचन्द्रिका, हितोपदेशः,संस्कृतगद्यमन्दाकिनी |
| 4 | चतुर्थं पत्रम् | दर्शनम् | कठोपनिषद्, श्रीमद्भगवद्गीता सर्गाः 3,11,12,14 संस्कृतसाहित्यपरिचयः |

## ऐच्छिकविषयाः

| क्र. सं. | पत्रम् | विषयः | निर्धारितं पुस्तकम् |
|---|---|---|---|
| 1 | पञ्चमं पत्रम् | आङ्ग्लम् | हिमाचप्रदेशशिक्षापरिषद्- (बोर्ड)द्वारा+2 कक्षायाः कृते निर्धारितः पाठ्यक्रमः |
| 2 | षष्ठं पत्रम् | हिन्दी-राजनीतिशास्त्र-इतिहासेषु अन्यतम् | हिमाचप्रदेशशिक्षापरिषद्- (बोर्ड)द्वारा+2 कक्षायाः कृते निर्धारितः पाठ्यक्रमः |

# शास्त्रिप्रथमवर्षम्

**अनिवार्यविषयाः**

| क्र. सं. | पत्रम् | विषयः | निर्धारितग्रन्थः |
|---|---|---|---|
| 1 | SHT-A-I (Major/core-I) | व्याकरणम् | वैयाकरणसिद्धान्तकौमुदी- संज्ञा-परिभाषा-सन्धि-षड्लिङ्गप्रकरणानि शब्दरूपप्रकरणम् |
| 2 | SHT-A-II (Major/core-II) | व्याकरणम् | वैयाकरणसिद्धान्तकौमुदी-कारक-स्त्रीप्रत्यय-प्रकरणे पाणिनिय शिक्षा |
| 3 | SHT-B-II (Major/core-II) | साहित्यम् | अभिज्ञानशाकुन्तलम् 1-4 अङ्काः, हिमाचलवैभवम् 1 निसर्गः,वृत्तरत्नाकरः तृतीय-अध्यायः |
| 4 | SHT-B-II (Major/core-II) | साहित्यम् | शिवराजविजयम् प्रथमविरामः,1-2 निश्वासः, मेघदूतम्( पूर्वमेघः), रचनानुवादः। |

**ऐच्छिकविषयाः(त्रिषु विषयद्वयं चेतव्यम्)**

| क्र. सं. | पत्रम् | विषयः | निर्धारितग्रन्थः |
|---|---|---|---|
| 1 | SHT-C-I (Major/core-I) | दर्शनम् | कणादगौतमीयम् ( सम्पूर्णम्) |
| 2 | SHT-C-II (Major/core-II) | दर्शनम् | सांख्यकारिका (सम्पूर्णम्) |
| 3 | SHT-D-I (Major/core-I) | वेदः | ऋक्सूक्तसंग्रहः, ऋग्वेदसम्बन्धित-आरण्यक-उपनिषद्-ब्राह्मणानां परिचयः, वेदाङ्गपरिचयः |
| 4 | SHT-D-II (Major/core-II) | वेदः | निरुक्त-1,2,7 इत्येते अध्यायाः,ऋग्वेदभाष्यभूमिका (वेदाङ्गभागमात्रम्) |
| 5 | SHT-E-I (Major/core-I) | ज्योतिषम् | बृहद् –अवक-होडाचक्रम(सम्पूर्ण), गोलपरिभाषा |
| 6 | SHT-E-II (Major/core-II) | ज्योतिषम् | ताजिकनीलकण्ठी |

**विशिष्टशास्त्रिनिमित्तम् ऐच्छिकविषयाः**

| | | | |
|---|---|---|---|
| 1 | English | Anyone Of DSC Courses(6Credits) | Equivalent Examination Of B.A. as H.P.U. |
| 2 | Anyone Of Hindi, Pol.Sci.etc. | Anyone Of DSC Courses (6Credits) | Equivalent Examination Of B.A. as H.P.U. |

# शास्त्रिद्वितीयवर्षम्

**अनिवार्यविषयाः**

| क्र. सं. | पत्रम् | विषयः | निर्धारितग्रन्थः |
|---|---|---|---|
| 1 | SHT-A-III (Major/core-III) | व्याकरणम् | वैयाकरणसिद्धान्तकौमुदी- भवादिगणः, समासप्रकरणम्, धातुरूपाणि। |
| 2 | SHT-A-IV (Major/core-IV) | व्याकरणम् | वैयाकरणसिद्धान्तकौमुदी- अदादिगणम् आरभ्य चुरादिगणपर्यन्तम्, प्रक्रियाः ( णिजन्त-सनन्त-यङन्त-नामधातु, आत्मनेपदम्) धातुरूपाणि च |
| 3 | SHT-B-III (Major/core-III) | साहित्यम् | उत्तररामचरितम् 1 – 4 अङ्कपर्यन्तम्, साहित्यदर्पणस्य प्रथमद्वितीयपरिच्छेदौ तृतीयपरिच्छेदस्य 35- 80 कारिकाः विहाय तथाच षष्ठपरिच्छेदः 47-312 कारिकाः विहाय। |
| 4 | SHT-B-IV (Major/core-IV) | साहित्यम् | कादम्बरी कथामुखे शुकनासोपदेश, किरातार्जुनीय (प्रथमःसर्गः) निबन्धः अनुवादश्च |

**ऐच्छिकविषयाः (त्रिषु विषयद्वयं चेतव्यम्)**

| क्र. सं. | पत्रम् | विषयः | निर्धारितग्रन्थः |
|---|---|---|---|
| 1 | SHT-C-III (Major/core-III) | दर्शनम् | योगसारसङ्ग्रहः(सम्पूर्णः), मुण्डकोपनिषद् |
| 2 | SHT-C-IV (Major/core-IV) | दर्शनम् | अर्थसङ्ग्रहः सम्पूर्णः |
| 3 | SHT-D-III (Major/core-III) | वेदः | शुक्लयजुर्वेदस्य 14तमः,31तमः,40 तमः अध्यायः, यजुर्वेदसम्बद्धशाखानां, ब्राह्मणानां, आरण्यकानां, उपनिषदां च परिचयः। |
| 4 | SHT-D-IV (Major/core-IV) | वेदः | स्वरप्रक्रियाप्रकाशः (1तमात् 4 प्रकाशपर्यन्तम्) यज्ञवल्क्यशिक्षा। |
| 5 | SHT-E-III (Major/core-III) | ज्योतिषम् | जातकालङ्कारः ( सम्पूर्णः) |
| 6 | SHT-E-IV (Major/core-III) | ज्योतिषम् | मुहूर्तचिन्तामणिः(संस्कारविवाहप्रकरणौ) उडुदायप्रदीपः (सम्पूर्णः)। |

**विशिष्टशास्त्रिनिमित्तम् ऐच्छिकविषयाः**

| | | | |
|---|---|---|---|
| 1 | English | Anyone Of DSC Courses(6Credits) | Equivalent Examination& Syllabus Of B.A.II as H.P.U. |
| 2 | Anyone Of Hindi, Pol.Sci.etc. | Anyone Of DSC Courses (6Credits) | Equivalent Examination& Syllabus Of B.A.II as H.P.U. |

# शास्त्रितृतीयवर्षम्

**अनिवार्यविषयाः**

| क्र. सं. | पत्रम् | विषयः | निर्धारितग्रन्थः |
|---|---|---|---|
| 1 | SHT-A-V (Major/core-V) | व्याकरणम् | कृदन्तप्रकरणम्(मध्यसिद्धान्तकौमुदी),महाभाष्यम्(प्रथमाह्निकम्) लिङ्गानुशासनम्। |
| 2 | SHT-A-VI (Major/core-VI) | व्याकरणम् | तद्धितप्रकरणम् (मध्यसिद्धान्तकौमुदी), उणादिप्रकरणम्( मध्यसिद्धान्तकौमुदी) |
| 3 | SHT-B-V (Major/core-VI) | साहित्यम् | संस्कृतसाहित्येतिहासः,नैषधीयचरितम्( प्रथमः सर्गः) |
| 4 | SHT-B-VI (Major/core-VI) | साहित्यम् | काव्यप्रकाशः1,2,3,4( शान्तरसपर्यन्तम्), 8,9,10 उल्लासाः |

**ऐच्छिकविषयाः (त्रिषु विषयद्वयं चेतव्यम्)**

| क्र. सं. | पत्रम् | विषयः | निर्धारितग्रन्थः |
|---|---|---|---|
| 1 | SHT-C-V (Major/core-v) | दर्शनम् | वेदान्तसारः, माण्डूक्योपनिषद् । |
| 2 | SHT-C-VI (Major/core-VI) | दर्शनम् | नास्तिकदर्शनम्, भारतीयदर्शनम्, अध्यात्मविवेचनम्। |
| 3 | SHT-D-V (Major/core-V) | वेदः | अथर्ववेदस्य भूमिसूक्तम्,अथर्ववेदस्य संहिता-ब्राह्मण-आरण्यक-उपनिषदां परिचयः |
| 4 | SHT-D-VI (Major/core-VI) | वेदः | वैदिकसाहित्येतिहासः, पारस्करगृह्यसूत्रम्। |
| 5 | SHT-E-V (Major/core-V) | ज्योतिषम् | बृहज्जातकम् (1 तः 6 पर्यन्तम् अध्यायाः), भारतीयज्योतिषशास्त्रस्येतिहासः |
| 6 | SHT-E-VI (Major/core-VI) | ज्योतिषम् | सूर्यसिद्धान्तम्( चन्द्रग्रहणाधिकारपर्यन्तम्) |

**विशिष्टशास्त्रिनिमित्तम् ऐच्छिकविषयाः**

| | | | |
|---|---|---|---|
| 1 | English | Anyone Of DSC Courses(6Credits) | Equivalent Examination& Syllabus Of B.A.II as H.P.U. |
| 2 | Anyone Of Hindi, Pol.Sci.etc. | Anyone Of DSC Courses (6Credits) | Equivalent Examination& Syllabus Of B.A.II as H.P.U. |

## महाविद्यालय-शुल्कः

महाविद्यालये प्रवेशाय विद्यार्थिभ्यः हिमाचलप्रदेशशिक्षाविभागेन हिमाचलप्रदेशविश्वविद्यालयेन च निर्धारितः शुल्कः स्वीकरिष्यते। यदि प्राप्तप्रवेशः छात्रः महाविद्यालये उपस्थितः न भवति अथवा मध्येसत्रं महाविद्यालयं त्यक्त्वा गच्छेत् तर्हि तस्मै प्राप्तस्य शुल्कस्य प्रतिदानं नास्ति। नियमानुसारेण मात्रं सुरक्षानिधेः एव प्रतिदानम् अस्ति। कक्षायाम् अनुपस्थितेः रूपयद्वयम् आर्थिकदण्डः भविष्यति।

प्रवेशशुल्कविवरणम्

1 प्रवेशशुल्कः 25.00
2 गृहपरीक्षाशुल्कः 40.00/25.00
3 परिसरविकास-सौन्दर्यीकरण-शुल्कः 10.00
4 छात्रसाहाय्य-शुल्कः2.00
5 सांस्कृतिक-कार्यक्रम-शुल्कः20.00
6 पत्रिका-शुल्कः100.00
7 चिकित्सा-निधि-शुल्कः 6.00
8 परिचयपत्रशुल्कः 30.00
9 एन. सी. सी.-शुल्कः 5.00
10 सङ्गणक-अन्तर्जाल-शुल्कः 20.00
11 समामेलित-निधिः (Amalgamated Fund) 300.00 (25.00/ मासिकः)
12 क्रीडानिधिः240.00 (20.00/ मासिकः)
13 भवननिधिः120.00 (10.00/ मासिक)
14 Rover And Ranger Fund 60.00 ( 5.00 /मासिकः)
15 पुस्तकालय-निधिः 100.00 (प्रतिदेय)
16 विशिष्टपाठन-शुल्कः(Tuition Fee) 0.00
17 पञ्जीकरण-शुल्कः / नियमितता-शुल्कः ( Continuation Fee) 200.00/41.00
18 अभिभावकाध्यापकसमिति-शुल्कः (P.T.A.) 1000.00

## छात्रवृत्तयः

योग्यतासूच्यां प्राप्तस्थानानां, अनुसूचितजातीनां, जनजातीनां, आई.आर.डी.पी.इति वर्गीयाणां. ओ.बी.सी. इत्यादीनां च  परिवाराणां विद्यार्थिनां कृते शिक्षाविभागद्वारा छात्रवृत्तिः दीयते। छात्रवृत्तिप्रात्यर्थं छात्रेण स्वयमेव अन्तर्जालमाध्यमेन आवेदनं कृत्वा निर्धारितायाम् अवधौ आवेदनस्य प्रतिलिपिः महाविद्यालये दातव्या।

श्रीबद्रिकाश्रमच्छात्रवृत्ति-योजना

श्रीबदरिकाश्रमः गिरिगङ्गातीरे परमश्रद्धेयानाम् ओमस्वामिनां मार्गदर्शने सञ्चाल्यमानः वर्त्तते। द्वादश्यां कक्षायां प्रतिशतं सप्ततिः अर्जिताङ्काः छात्राः छात्रवृत्तिम् एतां प्राप्तुम् अर्हाः भवन्ति। छात्रवृत्तिं कः प्राप्स्यति इति अस्य निर्णयः आश्रमप्रतिनिधिभिः स्वीक्रीयमाणेन साक्षात्कारेण भवति। छात्रवृत्तिरूपेण एकस्य वर्षस्य प्रवेशशुल्कराशिः समं धनं छात्रः प्राप्नोति।

## छात्रावासः

महाविद्यालयस्य श्रीमहामायाबालासुन्दरी नामकः छात्रावासः वर्त्तते। अस्य निर्माणं श्रीजगन्नाथमन्दिरन्यासेन कारितम् आसीत्। अत्र छात्राणां विंशत्याः आवासयोग्या व्यवस्था अस्ति। छात्रावासेऽस्मिन्  सिरमौरजनपदस्य दूर्वतिभ्यः ग्रामेभ्यः संस्कृतस्य शिक्षाप्राप्त्यर्थम् आगताः छात्राः शरणं प्राप्नुवन्ति। बालिकानां कृतेऽपि महाविद्यालयं निकषा एव छात्रावासस्य निर्माणं सर्वकारेण कारितम् अस्ति। अस्य महाविद्यालयाय हस्तान्तरणस्य प्रक्रिया अन्तिमस्तरे वर्त्तते। छात्रावासस्य लोकार्पणानन्तरं प्रायः अस्मिन् एव सत्रे अत्र बालिकानां वासस्य प्रारम्भः भवितुं शक्नोति।

## पुस्तकालयः

महाविद्यालये समृद्धः पुस्तकालयः अस्ति । अस्मिन् संस्कृतस्य विशालं वैदिकलौकिकवाङ्मयं तु वर्त्तते एव अनेन सहैव छात्राणां साहाय्याय अपि पुस्तकानि सन्ति। पुस्तकालयेऽस्मिन् सर्वविधं दुर्लभं सहित्यम् सुलभम् अस्ति।  संस्कृतभाषानिबद्धाः विविधाः ग्रन्थाः अत्र सुलभाः सन्ति येषां प्रयोगः अनुसन्धातारः कुर्वन्तः सन्ति।

# सामान्य-नियमाः

1 प्रत्येकमपि विद्यार्थी महाविद्यालय-परिसरात् बहिः सदसदाचरणाय स्वयमेव उत्तरदायी भविष्यति।

2 अशिष्ट-व्यवहाराय स्पष्टीकरणम्, आर्थिकदण्डः, निष्कासनं वा महाविद्यालयपक्षतः व्यवहर्त्तुं शक्यते। अशिष्ट-व्यवहारे संलिप्तस्य विद्यार्थिनः छात्रवृत्तेः निरोधः अपि शक्यते।

3 महाविद्यालये अनुपस्थितेः कक्षायाम् अनुपस्थितेः वा आर्थिक-दण्डः दातव्यः भविष्यति। यदि उपस्थितेः प्रतिशतं पञ्चसप्ततेःन्यूना उपस्थितिः भविष्यति तर्हि परीक्षार्थम् आवेदनं कर्त्तुम् अनुमतिः नैव दास्यते।

4 महाविद्यालयस्य छात्रः छात्रा वा काचित् राजनीतिक-गतिविधिषु भागं नैव ग्रहिष्यति।

5 महाविद्यालये अध्येतृभिः विद्यार्थिभिः छात्रैः परिचपत्रं महाविद्यालकार्यालयात् प्राप्तव्यः अपिच प्रत्येकमपि छात्रस्य महाविद्यालयागमनं सपरिचयपत्रमेव भवेत्।

6 परिचयपत्रस्य लोपे, 50/- रूप्यकाणि शुल्कं दत्त्वा एव पुनः प्राप्तुं शक्यते।

7 महाविद्यालये छात्रप्रताडानायाः( Raging ) अनुमतिः नास्ति। छात्रप्रताडना कश्चन अपराधः इति हिमाचलप्रदेश-सर्वकारेण घोषितम् एव अस्ति। अतः दोषेऽस्मिन् संलिप्ततायां सत्यां महाविद्यालयद्वारा विधिसम्मतं दण्डनं विधास्यते।

8 अस्माकं महाविद्यालय-परिसर-स्वच्छतायां समेषामपि छात्राणां सहयोगः अपेक्षितः।

1 विद्यार्थिनः पुस्तकालयात् पञ्चदशदिनानां कृते पुस्तकं प्राप्तुं शक्नुवन्ति। यदि छात्रः 15 दिनानाम् अनन्तरं पुसतकं पुस्तकालये न अर्पयति तर्हि छात्रेण एकं रूपयं प्रतिदिनं विलम्बशुल्कं दातव्यं भविष्यति।

2 विद्यार्थी एकवारं पुस्तकद्वयमेव स्वीकर्तुं शक्नोति। योग्याय निर्धनछात्राय प्राचार्यमहोदयस्य अनुमत्या पुस्तकद्वयात् अधिकम् अपि 15 दिनात्मकात् कालात् अधिकाय कालय दातुं शक्यते।

3 सन्दर्भपुस्तकानि तथाच दुर्लभानि पुस्तकानि दातुं न शक्यन्ते। एतानि पुस्कालये पठनियानि भविष्यन्ति।

4 पुस्तकस्य लोपः, उत्पटनं नाशः वा यदि भवति तर्हि विद्यार्थिना समानम् एव पुस्तकं क्रीत्वा पुस्तकालये दातव्यं भविष्यति अथवा तत्समं मूल्यं पूस्तकालयाध्यक्षाय दातव्यं भविष्यति।

5 पुस्तकालय-नियमानाम् उल्लङ्घने विद्यार्थिनं दण्डयितं प्राचार्यः अधिकृतः अस्ति।

## राष्ट्रिय-सेवा-योजना

राष्ट्रिय-सेवा-योजनायाः सञ्चालनं राष्ट्रस्य युवशक्तेः वक्तित्व-विकासाय भारतसर्वकारस्य युवकार्यक्रमः एवं क्रीडा इत्याख्येन मन्त्रालयेन सञ्चालितः सक्रियः कश्चन कार्यक्रमः वर्त्तते। अस्यां योजनायां प्रतिभागिभिः विद्यार्थि-स्वयंसेवकैः समाजिकानां सहयोगेन समाजस्य हितकार्याणि क्रियन्ते। साक्षरता-पर्यावरणसुरक्षा-स्वास्थ्य-स्वच्छतादीनां कृते कार्यं आपदि च आर्तानां जनानां साहाय्यं कथं कर्त्तव्यम् इत्येतादृशं शिक्षणम् एव अस्याः योजनायाः लक्ष्यम् अस्ति। समाज-सेवायाः चिकिर्षूणां छात्राणां कृते अयं कश्चन सर्वकारीयः विकल्पः अस्माकं विद्यालये अपि उपलब्धः अस्ति। महाविद्यालये राष्ट्रिय-सेवा-योजनायाः स्वयंसेवकत्वेन पञ्जीकर्तुं पञ्जीयनं जुलै-मासे सत्रारम्भे भवति। छात्राः राष्ट्रिय-सेवा-योजनायाः गतिविधीनां विषये सूचनापट्टमाध्यमेन सूच्यन्ते। इच्छुकाः छात्राः राष्ट्रिय-सेवा-योजना-अधिकारिणा सह सम्पर्कं साधयितुं शक्नुवन्ति।

## एन.सी.सी. इत्याख्या योजना

एन सी सी इत्याख्यस्य सर्वकारद्वारा सञ्चालितस्य सेवा-संघटनस्य स्थापना, एन. सी. सी. 1948 राष्ट्रिय-कैडिट-कोर इत्याख्येन अधिनियमेन सञ्जाता। थलसेना-वायुसेना-जलसेनया सम्बद्धः अयं किञ्चन सेवासंघटनं छात्रजीवने विद्याभ्याससमये एव छात्रेषु देशसेवाभावानाम् उद्भावयति। महाविद्यालये प्रविष्टः छात्रः वर्षत्रयं यावत् अनेन संघटनेन युक्तः सन् विविधैः प्रशिक्षणैः प्रशिक्षितः भारतमातुः सेवार्थं प्रेरितः भवति। अत्र येषां जनानां पञ्जीकरणं भवति भारतीय-सेनया तेषां कृते लघु-अस्त्राणां भुशुण्ड्यादीनां सञ्चालानाभ्यासः अपि कार्यते। अत्र प्रविष्टानां छात्राणां पार्श्वे गणतन्त्रदिवसे राजपथे सञ्चलस्य कश्चन अवसरः भवति। अस्य संघटनस्य शाखा अस्माकं महाविद्यालये अपि वर्त्तते। स अस्मिन् प्रवेशाय चयनस्य काचित् प्रक्रिया वर्त्तते। इदं सङ्घटनं जीवने कथम् अस्माभिः अनुशासनं पालनीयम् इति शिक्षयति। अनेन संघटनेन त्रिषु वर्षेषु परिक्षात्रयं स्वीकृत्य सी इत्याख्यं प्रमाणपत्रं ददाति। प्राप्तप्रमाणपत्रैः विद्यार्थिभिः भातीय-सशस्त्र-सेनायां वृत्त्यर्थं लिखितपरीक्षा न लेखनीया इत्यपि अस्य कश्चन लाभः भवति। आगामिनि काले सशस्त्रसेनायां एतेषां कृते विशिष्टम् आरक्षणम् अपि भवितुं शक्नोति इति कश्चन विचारः सर्वकारस्तरे प्रचलति।

## केन्द्रीय-छात्र-सङ्घटनम्

राजनीतिः वर्त्तमाने राज्ञामनीतिः राजकुटुम्बनाम् एव नीतिः इत्येव निर्वचनं न युक्तं भाति। अद्यत्वे राजनीतेः सम्बन्धः सर्वेण अपि जनेन वर्त्तते एव। राजनीतेः एकैकस्यापि निर्णयस्य प्रभावः समाजस्य उपरि भवति। विद्यार्थिनः अपि अस्य समाजस्य अङ्गभूताः भवन्ति। भविष्ये नेतारः अपेक्षन्ते एव। अतः विद्यार्थिजीवने एव यदि छात्रेषु नेतृत्वस्य संस्कारः जायेत तर्हि वरम् एव। एतद्धीया एव हिमाचलप्रदेशसर्वकारेण विश्वविद्यालयेषु महाविद्यालयेषु च छात्रसंघस्य अपि अवधारणायाः क्रियान्वयनं कृतम् अस्ति। हिमाचलप्रदेश-विश्वविद्यालयात् यथासमयं निर्धारित-नियमानुसारेण महाविद्यालयीय-छात्रसङ्घस्य घटनं प्रतिवर्षं भवति। अयं छात्रसंघः आवर्षं महाविद्यालये आयोज्यमानान् कार्यक्रमान् निष्पादयितुं महाविद्यालयप्रशासनस्य सर्वदा सहयोगं करोति। विविधान् कार्यक्रमान् सम्पादयितुं महाविद्यालयप्रशासनेन छात्रसंघस्य कृते विविधानि दायित्वानि दीयन्ते। एवं महाविद्यालयप्रशासनस्य सहयोगसमनन्तरमेव विद्यार्थिषु नेतृत्वस्य गुणानां विकासः भवति। वर्त्तमाने विश्वविद्यालयस्य आदेशानुसारम् अस्य सङ्घस्य विविधानां पदानां चयनं योग्यतासूच्यनुगुणम् अर्थात् अप्रत्यक्षमाध्यमेन भवति।

## वाटिका (Eco club)

पर्यावरणस्य रक्षणं नितान्तम् आवश्यकं वर्त्तते। अस्माकं सर्वेषां कर्त्तव्यम् अस्ति यत् प्रत्येकम् अपि जनः पर्यावरणस्य रक्षां कुर्यात्। सर्वकारः अपि एतन्निमितं विविधानां योजनानां कार्यक्रमाणां च सञ्चालनं करोति येन जनाः पर्यावरणं प्रति जागरूकाः भवेयुः। वाटिका इत्यपि सर्वकारद्वारा सञ्चालितः कश्चन कार्यक्रमः अस्ति यस्य माध्यमेन छात्रेषु पर्यावरणसंरक्षणस्य कश्चन संस्कारः छात्राणां मनस्सु उद्भावनीयः। छात्राः अस्य कार्यक्रमस्य कृते स्वस्य पञ्जीकरणं कारयन्ति। महाविद्यालये प्राक्शास्त्रि-छात्राः एव वाटिकायाः सदस्यरूपेण चीयन्ते। चिताः छात्राः आवर्षं विधान् कार्यक्रमान् कुर्वन्ति। पर्यावरण-जागरूकता-यात्रा, महाविद्यालय-परिसरे पुष्पकेदाराणां निर्माणं तेषां रक्षणं पोषणम्, महाविद्यालयस्य सौर्दयीकरणम् इत्यादीनि कार्याणि क्रियन्ते। वाटिकेयं छात्राः पर्यावरणं प्रति जागरूकाः भवेयुः इति विविधाभिः गतिविधिभिः यतते।

## क्रीडा

शरीरम् आद्य खलु धर्मसाधनम् इत्युक्तिप्रसिद्धा । शरीरस्य साधना क्रीडाभिः भवति इति ज्ञातचरम् एव। महाविद्यालयस्य छात्राणां शरीरसौष्ठवाय विविधाः क्रीडाः प्रतिवर्षम् आयोज्यन्ते। प्रतियोगितायाः निमित्तं छात्राणां विभाजनं वर्गद्वये भवति। कनिष्ठवर्गः वरिष्ठवर्गश्च। कनिष्ठवर्गे प्राक्शास्त्रिकक्षायाः छात्राः भवन्ति वरिष्ठवर्गे च शास्त्रिकक्षाणां छात्राः। एतयोः वर्गयोः बालकानां बालिकानां च प्रतियोगिताः भवन्ति। विजेतॄणां छात्राणां सम्माननं वार्षिकपारितोषिक-वितरण-समारोहे भवति। महाविद्यालयस्य छात्राणां पर्श्वे हिमाचलप्रदेश-विश्वविद्यालयेन आयोजितासु प्रतियोगितासु यथासामर्थ्यं भागं ग्रहितुम् अपि अवसरः भवति।

## शैक्षणिकं पर्यटनम्

छात्राणां समग्रविकासाय यथासमयं व्यस्थितरूपेण शैक्षणिक-भ्रमणस्य महाविद्यालयद्वारा व्यवस्था क्रियते। एतन्निमितं जातस्य धनव्ययस्य अर्धभागः महाविद्यालयेन दीयते। अस्य भ्रमणस्य उद्देश्यम् एतादृशिभिः गतिविधिभिः छात्राणां सामाजिकः कश्चन अनुभवः, ऐतिहासिकानां, शैक्षिकानां स्थानानां ज्ञानं च भवति। एतादृसासु गतिविधिषु शिक्षकाणाम् अपि सहभागः भवति।

## वार्षिक-पारितोषिक-वितरणम्

पारितोषिकं प्रत्येकमपि जनस्य मनः तोषयति कार्यकरणाय च प्रेरयति। आवर्षं महाविद्यालये द्विविधप्रतिस्पर्धानां सञ्चालनं भवति, परीक्षासु च छात्राः प्रशंसनीयं प्रदर्शनं कुर्वन्ति। एतादृशाणां मेधाविनां छात्राणां प्रोत्साहनम् आवश्यकं भवति। प्रोत्साहनाय प्रतिवर्षं महाविद्यालयः शैक्षणिकगतिविधिनां शिक्षणेतरगतिविधीनां च क्षेत्रे उत्कृष्टानां छात्राणां कृते विविधानां पुरस्काराणां व्यवस्थां करोति।

## सत्रम् - 2023-2024

| | | |
|---|---|---|
| 1 | कक्षाप्रारम्भः | - अगस्तमासस्य प्रथमदिनाङ्कतः |
| 2 | एन. एस. एस./एन. सी. सी./ वाटिका ( इकोक्लब) छात्रपञ्जीकरणम् | - अगस्तमासस्य तृतीयः सप्ताहः |
| 3 | अभिभावक-शिक्षक-संघ- उपवेशनम् | - अगस्तमासस्य चतुर्थः सप्ताहः |
| 4 | केन्द्रीय-छात्र-सङ्गठनम् | - सितम्बर-मासस्य प्रथमः सप्ताहः |
| 5 | दीपवली-अवकाशाः | - 10/11/2023 तः 14/11/2023 |
| 6 | गृहपरीक्षा | - नवम्बरमासस्य अन्तिमः सप्ताहः |
| 7 | शरत्कालिकाः अवकाशाः | |
| 8 | वार्षिक-शैक्षणिक-प्रतियोगिताः | - फरबरीमासस्य द्वितीयःसप्ताहः |
| 9 | वार्षिक-क्रीडाप्रतियोगिताः | - फरबरीमासस्य द्वितीयः सप्ताहः |
| 10 | वार्षिकपुरस्कार-वितरण-समारोहः | - मार्चमासस्य द्वितीयः सप्ताहः |
| 11 | सत्रान्तपरीक्षा | - 15/04/2024 तः 20/05/2024 |